शास्त्री-I खण्ड साहित्य

अभिज्ञानशाकुन्तलम् - षष्ठोऽङ्कः

Saathi

Date ___/___/___

एष त्वामभिनवकण्ठशोणितार्थी शार्दूलः पशुमिव हन्मि चेष्टमानम् ।
आर्तानां भयमपनेतुमात्तधन्वा दुष्यन्तस्तव शरणं भवत्विदानीम् ।।

उत्तरम् — प्रसंगः — प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य अभिज्ञान-शाकुन्तलम् नाट्यशास्त्रस्य षष्ठोऽङ्कात् उद्धृतोऽस्ति ।

व्याख्या — अस्मिन् श्लोके राजा दुष्यन्त नेपथ्ये विदूषकस्य करुण क्रन्दनमाकर्ण्य तद्रक्षणार्थं धनुर्बाणं च गृहीत्वा यावत् परिक्रामति तावदेव नेपथ्ये केनापि अदृश्येन पुंसा प्रोच्यमानं वचनं शुश्राव — अभिनवकण्ठशोणितार्थी = उष्णोष्णकण्ठरुधिरपानाभि-लाषी एषः एषोऽहम् शार्दूलः = व्याघ्रः पशुमिव = हरिणादिरसा-धारणं जन्तुमिव चेष्टमानं = इतस्ततो लुण्ठन्तम् प्राणरक्षणार्थं प्रयतमानं त्वां हन्मि = व्यापारयामि आर्तानां = भीतानां भयं = भीतिम् अपनेतुं = दूरीकर्तुम्, आत्तधन्वा = अधिज्यधन्वा गृहीतचापः दुष्यन्तो नृपतिः तव सखा इदानीं = अस्मिन् मत्पराक्रमप्रकाशक्षणे तव वध्यमानस्य विदूषकस्य शरणं रक्षकः, सहायकः भवतु = स्यात् यदि तस्य शक्तिरस्ति ।
नेपथ्येऽश्रूयत यत् शार्दूलो मृगादीनां रुधिरमिव तवकवोष्णकण्ठ शोणितपिपासुरहं त्वां हन्मि । आर्तानां भयनिवारणायात्तधन्वा दुष्यन्तो यदि प्रभवेत् तर्हि समागत्य त्वां रक्षतु । मन्ये मया गृहीतस्य तव रक्षणे नास्ति तस्य शक्तिः, तस्य पश्चात् एव त्वां हन्मीति भावः । अत्रोपमानुप्रासौ अलङ्कारौ प्रहर्षिणीछन्दः

Renu Devi
19/09/20

शान्ति उमाकान्त सं० महावि० सुखसेना पूर्णिया ।

शास्त्री-II खण्ड साहित्य

रघुवंश महाकाव्यम्

त्रयोदशः सर्गः

Date ___/___/___

त्वया पुरस्तादुपयाचितो यः सोऽयं वटः श्याम इति प्रतीतः ।
राशिर्मणीनामिव गारुडानां सपद्मरागः फलितो विभाति ॥

उत्तरम्- प्रसंगः- प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंशमहाकाव्यस्य त्रयोदश सर्गात् उद्धृतास्ति । अस्मिन् श्लोके श्रीरामः सीतां प्रति कथयति- प्रिये! पूर्वं मया साकम् एत्य यं वटं वृक्षं त्वं प्रार्थितवती, श्यामवटनाम्ना प्रसिद्धः सोऽयं साम्प्रतं फलितः पत्रेषु हरिद्वर्णः फलेषु च रक्तवर्णः पद्मरागमणिभिः युक्तः मरकत-मणिरिव शोभते । सीताया वरेण प्रार्थनमेवं वर्णितं वाल्मीकीये रामायणे -

न्यग्रोधं समुपस्थाय वैदेही वाक्यमब्रवीत् ।
नमस्तेऽस्तु महावृक्ष! पालयेन्मे व्रतं पतिः ॥

व्याख्या - हे प्रिये! त्वया = भवत्या । पुरस्तात् = प्राक् । यः = वटः । उपयाचितः = प्रार्थितः । श्याम इति = श्यामनामकः । प्रतीतः = प्रख्यातः । सोऽयं वटः = पुरोवर्ती न्यग्रोधः । फलितः = सञ्जातफलः सन् । सपद्मरागः = पद्मराग-सहितः । गारुडानाम् = मरकतानाम् । मणीनाम् = रत्नानाम् । राशिरिव = पुञ्जसमूह इव । विभाति = शोभते ।

Renu Devi
19/09/20
राधा उमाकांत सं० महावि० सुखसेना, पूर्णिया

उपशास्त्री - I खण्ड साहित्य - तृतीय - पत्रम्
रघुवंश महाकाव्यम्
द्वितीयः सर्गः

Date ___/___/___

प्रश्न - तदाप्रभृत्येव वनद्विपानां त्रासार्थमस्मिन्नहमद्रिकुक्षौ ।
व्यापारितः शूलभृता विधाय सिंहत्वमङ्कागतसत्त्ववृत्तिः ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंशमहाकाव्यस्य द्वितीयसर्गात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके कुम्भोदरः दिलीपं प्रति कथयति - पार्वतीशोकसमयादेव भगवान् शिवः आरण्यकगजानां भयार्थं मां सिंहं विधायात्र नियुक्तवान्, उक्तवांश्च मां यदत्र यदृच्छयागतजन्तुमात्र भक्षणमेव ते जीविका भविष्यति अतोऽहं क्षणमात्रमपि इतोऽन्यत्र गन्तुं न शक्नोमि ।

व्याख्या - तदाप्रभृत्येव = तं कालमारभ्यैव, वनद्विपान् = कानन-हस्तिनां अङ्कागतसत्त्ववृत्तिः = समीपागतजन्तुभक्षणमात्र-जीविकम्, सिंहत्वं = मृगेन्द्रत्वम्, विधाय = कृत्वा अस्मिन् = अमुस्मिन्, अद्रिकुक्षौ = पर्वतगह्वरे, अहं = कुम्भोदरो नाम गणः । व्यापारितः = नियुक्तः ।

Renu Devi
19/09/20
राधा उमाकान्त सं० महावि० सुरवसेना
पूर्णिया ।

उपशास्त्री-I खण्ड साहित्य तृतीय-पत्रम्
रघुवंशमहाकाव्यम् -द्वितीय सर्गः

Date ___/___/_____

प्र०(1)- सञ्चारपूतानि दिगन्तराणि कृत्वा दिनान्ते निलयाय गन्तुम् ।
प्रचक्रमे पल्लवरागताम्रा प्रभा पतङ्गस्य मुनेश्च धेनुः ॥

उत्तरम् -प्रसंगः- प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंशमहाकाव्यस्य द्वितीय सर्गात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके राजा दिलीपः नन्दिन्याः विशेषवर्णस्य वर्णनं करोति -

व्याख्या - पल्लवरागताम्रा = किसलयरक्तवर्णा, पतंगस्य= सूर्यस्य, प्रभा = कान्ति, मुनेः = वसिष्ठस्य, धेनुश्च= नन्दिनी च, दिगन्तराणि = दिशामवकाशान्, सञ्चारपूतानि = परिभ्रमणपवित्राणि च, कृत्वा= विधाय, दिनान्ते = सायंकाले, निलयाय = आश्रमाय अस्ताचलाय च, गन्तुं = यातुम्, प्रचक्रमे = प्रवृत्ता ।

Renu Devi
19/09/20
राधा उमाकान्त सं० महावि० सुरवसेना, पूर्णिया ।